कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

पे. द. ७

६६

॥सप्तं पदार्थि॥

Acc. No. ~~२५९~~ M-1650
Title - सप्तपदार्थी.
Author - शिवादित्य (?)
Date - ?
Subject - न्याय.
Folio - 14
Xerox - 27.

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1650
Dist. Nagpur

त

श्रीगणेशायनमः॥ ॥हेतवेजगतामेवसंसारार्णव
सेतवे॥प्रभवेसर्वविद्यानांशंभवेगुरवेनमः॥१॥
प्रमितिविषयाःपदार्थाः॥तेचद्रव्यगुणकर्मसामा
न्यविशेषसमवायाभावाख्याःसप्तैव॥तत्रद्रव्या
॥१॥ णिपृथिव्यप्तेजो वाय्वाकाशकालदिगात्ममनांसि
नवैव॥गुणास्तु रूपरसगंधस्पर्शसंख्यापरिमाण ॥१॥
पृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखइ
च्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माध
र्मशब्दाश्चतुर्विंशतिरेव॥कर्मण्युत्क्षेपणापक्षेपणा
औकुंचनप्रसारणगमनानिपंचैव॥सामान्यंपर

नपरंपरापरंयेति त्रिविधं॥ विशेषास्तु यावन्नित्य
द्रव्यवृत्तित्वादनंता एव॥ समवायस्त्वेक एव॥ अभाव
स्तु प्रागभावप्रध्वंसाभावात्यंताभावान्योन्याभावभेदा
श्चतुर्विधः॥ पृथिवि चि नित्याऽनित्या च॥ परमाणुरूपा
नित्या कार्यस्त्वनित्या॥ सापि शरीरेंद्रियविशयरूपा॥
शरीरमस्मदादीनां प्रत्यक्षसिद्धं॥ इंद्रीयं गंधव्यंजकं॥
विशयो घटादि॥ आपोपि परमाणुलक्षणाः कार्यलक्ष
णाश्च॥ परमाणुरूपाः नित्याः कार्यरूपाः अनित्याः॥
ता अपि शरीरेंद्रीयविशयरूपाः॥ शरीरं वरुणलोके॥
इंद्रियं रसव्यंजकं॥ विशयाः समुद्रादि॥ तेजोपि नित्यम
नित्यं च॥ परमाणुरूपं नित्यं कार्यरूपमनित्यं॥ तदपि

स्तसरितू २

र.प्र

शारीरेंद्रियविषयरूपं॥ शारीरमादित्यलोके॥ इंद्रिय
रूपं व्यंजकं॥ विषयो भौमदिव्योदर्याकरजरूपश्चतु
र्विधः॥ वायुरपि नित्योऽनित्यश्च॥ परमाणुरूपो नित्यो
कार्यरूपोऽनित्यः॥ कार्यरूपः शारीरेंद्रियविषयप्राण
लक्षणः॥ शारीरं वायुलोके॥ इंद्रियं स्पर्शव्यंजकं॥
॥२॥ विषयो वृक्षादिकंपजनकः॥ प्राणश्च शरीरान्तं ॥२॥
संचारी॥ स एव क्रियाभेदादपानादिसंज्ञां लभते॥
स्तिमितवायुरूपपरमाणसमूह एव अनारब्धद्रव्यः॥
आकाशस्य घटाकाशादिभेदभिन्नोऽनंत एव॥ काल
स्तूत्पत्तिस्थितिविनाशलक्षणस्त्रिविधः॥ दिक् ऐंद्रि

आग्नेयी याम्या नैर्ऋती वारूणी वायवी कौबेरी ईशा
नी नाग्नी ब्राह्मी रौद्री चेति एकादशविधा॥ आकाशादि
त्रयं तु वस्तुतस्त्वैकमेवोपाधिभेदान्नाना त्वं॥
आत्मा तु परमात्मा क्षेत्रज्ञश्चेति द्विविधः॥ परमात्मा
ईस्वर एके॥ क्षेत्रज्ञा अस्मदादयो नंताः॥ मन
स्तु प्रत्यात्मनिवृत्वादनंतं॥ आकाशादि पंचकं नि
त्यमेव॥ अपरं नित्यानित्यात्मकं॥ रूपं तु सितलोहित
पीतकृष्णहरीतकपिलचित्रभेदात्सप्तविधं॥ रसो
पि मधुरतिक्तकटुकषायाम्ललवणाचित्रभेदात्सप्त
विधः॥ गंधस्तु द्विविधः सुरभिरसुरभिश्च॥ स्पर्शःशी

सप्त नुष्णाःसंयोगजश्चेति॥३

तोष्ण शीतभेदात्त्रिविधः॥संख्या एकत्वद्वित्वबहुत्वभे
दात्त्रिविधा॥परिमाणं अणुमहद्दीर्घह्रस्वभेदाच्च
तुर्विधं॥पृथक्त्वमेकानेकवृत्ति॥संयोगो द्विविधः क
र्मजो [illegible]॥विभागो द्विविधः कर्मजो विभाग
॥३॥ जश्चेति॥परत्वं कालकृतं दीक्कृतं च॥अपरत्वमपि ॥३॥
कालकृतं दिक्कृतं चेति॥बुद्धिरपि द्विविधा स्मृति
रनुभवश्च॥अनुभवोपि द्विविधः प्रमाऽप्रमा च॥
अप्रमापि संशयो विपर्ययश्च॥प्रमापि प्रत्यक्षम
नुमितिश्च॥प्रत्यक्षं सप्तप्रकारं॥अनुमितिरपि त्रिवि
धा॥लैंगस्य त्रैविध्यात्॥केवलान्वयी केवलव्यतिरे
तयेश्वर घ्राणरसनं चक्षुः श्रोत्रसत्वक्मनो लक्षणं॥२

के अन्वयव्यतिरेकी चेति ॥ तदपि स्वार्थं परार्थं चेति ॥
परार्थ्यंगानि प्रतिज्ञाहेतूदाहरणोपनयनिगमानि ॥
तरूपांगानि पक्षधर्मत्वं सपक्षेसत्वं विपक्षाद्यावृ
त्तिरबाधितविषयत्वं असत्प्रतिपक्षत्वं चेति ॥ तदाभा
साः असिद्धविरुद्धानैकांतिकानध्यवसितकालात्य
यपदिष्टप्रकरणसमाः ॥ तर्कस्वप्नौ संशयविपर्य
यरूपावेव ॥ सविकल्पकनिर्विकल्पकयोस्तु प्रमा
यामप्रमायां चांतर्भावः ॥ एवं प्रत्यभिज्ञाहानोपाद
नोपेक्षाज्ञानानामपि ॥ ऊहाऽनध्यवसाययोस्तु संश
र एव ॥ सुखंतु सांसारिकं स्वर्गश्चेति ॥ दुःखमपि दुःख

।.८

६।३

कारणमात्रवृत्तत्वं॥ इच्छापि साध्यविषया साधनवि
षयाच॥ द्वेषोपि साध्यविषयः साधनविषयश्च॥
प्रयत्नोपि विहितनिषिद्धोपि न विषयरूपः॥ गुरु
त्वं समाहाररूपं एकावयवविनिष्ठं च॥ द्रवत्वं सां
॥४॥ सिद्धिकं नैमित्तिकं च॥ स्नेहः स्वाभाविको औपाधि ॥७॥
कश्च॥ संस्कारो वेगो भावना स्थितिस्थापकश्च॥
धर्मः प्रवर्तको निवर्तकश्च॥ अधर्मो दुःखफलाव
सानो नमस्कारादिनाशश्च॥ शब्दो वर्णात्मकोऽवर्णा
त्मकश्च॥ अत्र। गंधो संयोगविभागपरत्वापरत्व
सुखदुःखद्वेषसंस्कारधर्माधर्मशब्दाः अनित्यैक

रूपाः॥ अन्ये नित्यानित्यरूपाश्च॥ संयोगविभाग
सुखदुःखद्वेष संस्कारधर्माधर्मशब्दा अव्यापकाः॥
बुद्धिइच्छा प्रयत्नाउभयरूपाः॥ अन्ये स्वाश्रयव्या
पकाः॥ उत्क्षेपणाद्यो विहितनिषिद्धोदासीनरूपाः॥
सामान्यं जातिरूपं उपाधिरूपं च॥ जातिः सत्ताद्रव्यत्व
गुणत्वकर्मत्वादि॥ उपाधिरूपं पाचकत्वादि॥ प्रागभा
वादयः प्रतियोगिभेदादनंता एव॥ मध्यत्वं परत्वाप
रत्वाभावः॥ अंधकारोप्यभाव एव॥ शक्तिः स्वरूपमेव॥
विशिष्टं तु विशेषणविशेष्यतत्संबंध एव॥ ज्ञातताज्ञा
नसंबंध एव॥ सादृश्यं उपाधिरूपं सामान्यं॥ लघुत्वं

सप्त

खुरत्वान्नावः॥ एवमन्यस्यापि पदार्थस्य सतो वात्रै
वांतर्भावः॥ यथा संख्याया इव गुणे॥ एतेषु च मध्ये
नित्यानां कारणत्वमेव अनित्यानां कारणत्वं कार्य
त्वं च॥ तच्च कारणं त्रिविधं॥ समवायीकारणं अस
॥५॥ मवायीकारणं निमित्तकारणं च॥ अपरे त्वेदाः स्व ॥५॥
यमूहनीयाः॥ एतेषां तत्वज्ञानं निश्रेयसहेतुः॥
तत्वमनारोपितं रूपं तस्य ज्ञानं अनुभवः॥ स च श्र
वणमनननिदिध्यासनतत्वसाक्षात्कारलक्षणश्च
तुर्विधः॥ निश्रेयसं पुनः तत्वज्ञानोत्पाद्य मिथ्याज्ञान
कारण प्रध्वंस समानाधिकरण तत्कार्य समस्त दुःखा

नात्को दुःखं दुःशरीरं षडिंद्रियाणि षड्विषयाः षड्बु
द्धयः सुखं दुःखं चेति एकविंशति भेदभिन्नं ॥
इदानिं लक्षणाधीनत्वात्तत्वज्ञानस्य लक्षणमेवो
च्यते ॥ तत्र केवलव्यतिरेकीहेतुविशेषो लक्षणं ॥
प्रयोगस्तु लक्षणमितरेभ्यो भिद्य केवलव्यती
रेकीहेतुविशेषत्वात् ॥ यदि इतरेभ्यो न भिद्यते
तत्केवलव्यतिरेकीहेतुविशेषवचनमपि न भवति
यथा धूमवत्व ॥ न च तथेदं तस्मादितरेभ्यो न भिद्यते
इति अपितु भिद्यत एव ॥ एवं सर्वत्र लक्षणे प्रयो
गो द्रष्टव्यः ॥ तत्र पदार्थलक्षणं क्रमेण द्रव्यं गुद्र
केवलव्यतिरेकीहेतुविशेषवे [illegible] वचनं न भवति न उ

11

क्त

व्यत्वसामान्ययोगि गुप ॥स्व समवायीकारणंचेति॥
गुणास्तु गुणत्वजा तीयो गीजातिमत्वेसत्यायव्वना
स्मकत्वेसति समवा ॥व रणत्व रहितश्चेतिं कर्मक
र्मत्वजातियोगि अ वस्त्र योगविज्ञागासमवायीका
रणंचेति॥ सामान्य नेत्यमेकमनेकसमवेतं॥ विशे
षस्तु सामान्यरहि ःएकव्यक्तिवृत्तिः॥ नित्यसंबंधः ॥६॥
॥६॥ समवायः॥ प्रतियो ज्ञानाधीनज्ञानोऽभावः॥ पृथि
वित्वसामान्यवतीगं वतीच पृथिवी॥ अप्त्वजातिमंतः
शीतस्पर्शा आपः॥ ते स्त्वजातियोगिनुष्णस्पर्शं तेजः॥
वायुत्वजातियोगि अ रूपस्पर्शवान्वायुः॥ शब्दगुणमा
काशं॥ आदित्यपरि र्तनोत्पाधपरत्वापरत्वासमवा

लः
त्तिकारणाधारः॥ परत्वापरत्वानधिकरणं का[illegible]॥ आ
दित्यसंयोगानुसाद्यपरत्वापरत्वासमवायिकारणाधा
रः॥ परत्वापरत्वानधिकरणं दिक्॥ आत्मत्वसामान्यवा
न् बुद्ध्यादिगुणवान् आत्मा॥ मनस्त्वजातियोगि स्पर्शशून्यं
त्रिपाधिकरणं मनः॥ रूपत्वजातिमच्चक्षुर्मात्रग्राह्यो
गुणो रूपं॥ रसत्वजातियोगि रसनग्राह्यो गुणो रसः॥
गन्धत्वजातियोगी घ्राणग्राह्यो गुणो गन्धः॥ स्पर्शत्वजाति
योगि स्पर्शनमात्रग्राह्यो गुणः स्पर्शः॥ संख्यात्वसामान्य
वती गणनासाधारणं कारणं संख्या॥ परिमाणत्वजाति
योगि मानव्यवहारासाधारणं कारणं गुणः परिमाणं॥ पृ

अपरत्वसामा य वत्परव्यवहारासाधारणकारणं अपरत्वं ॥५

सप्त

थक्त्वजातियोगि पृथक्त्वव्यवहारासाधारणकारणं गु
णः पृथक्त्वं ॥ संयोगत्वसामान्यवान् अनित्यः समंघः
संयोगः ॥ विभागत्वसामान्यक कौ विभक्तव्यवहा
रासाधारणकारणं गुणो विभागः ॥ परत्वसामान्य
योगि परव्यवहारासाधारणकारणं गुणः परत्वं ॥ बु
॥७॥ द्धित्वसामान्यवति आत्माश्रयो अर्थप्रकाशो बुद्धिः ॥ ॥७॥
सुखत्वसामान्यवन्निरूपाध्यनुकूलवेद्यं सुखं ॥ दुः
खत्वजातियोगि निरूपाधि प्रतिकूलवेद्यं दुःखं ॥ इच्छा
त्वसामान्यवती अर्थित्वलक्षणा इच्छा ॥ द्वेषत्वजातिमा
न् प्रज्वलनात्मको द्वेषः ॥ प्रयत्नसामान्यवान् प्रयत्न
त्वे

14

आधार

व्यवहारासा रणं कारणं प्रयत्नः॥ गुरुत्वजातिमदेक
वृत्तिपतनासमवायिकारणं गुरुत्वं॥ द्रवत्वजातिमदे
कवृत्ती स्यंदनासमवायिकारणं द्रवत्वं॥ स्नेहत्वसामा
न्यवान् द्रवत्वेतरन्यसंग्रहासाधारणकारणं स्नेहः॥ सं
स्कारत्वजातिमान् स्वेत्प[illegible]त्यवस्थापादको गुणः संस्का
रः॥ धर्मत्वसामान्यवान् सुखासाधारणकारणं धर्मः॥
अधर्मत्वसामान्यवान् दुःखासाधरणकारणं अधर्मः॥
शब्दत्वजातियोगिश्रो ग्राह्यो गुणः शब्दः॥ उत्क्षेपणजा स४
तिमदूर्ध्वदेशसंयोगासमवायिकारणं कर्म्मोत्क्षेपणं॥
अपक्षेपणत्वजातिमदधोदेशसंयोगहेतुः कर्मापक्षे
पणं॥ आकुंचनत्वजातिमद्वक्रत्वापादकं कर्माकुंचनं॥ प्र

र घ

तत्

सारणात्वसामान्यवत् आकुंचनं । पादकं कर्म प्रसारणं ॥
गमनत्वसामान्यवदनियदिग्देशसंयोगकारणंकर्म
गमनं ॥ व्यापकमात्रं सामान्यं परं ॥ व्याप्यमात्रं सामान्य
मपरं ॥ व्याप्यव्यापकरूपं सामान्यं परापरं ॥ अनादिः
सांतः प्रागभावः ॥ सादिरनंतः प्रध्वंसाभावः ॥ अनादिर
॥ ३॥ नंतः संसर्गाभावोऽत्यंताभावः ॥ तादात्म्यनिरोधेऽन्योन्या ॥८॥
भाव ॥ नित्यत्वं प्रध्वंसरहितः ॥ अनित्यत्वं प्रध्वंसावत्वंनि
रवयवः क्रियावानू परमाणुः ॥ द्रव्यसमवायीकारणं अ
वयवः ॥ द्व्यानारंभकं कार्यद्रव्यमंत्यावयवि ॥ प्रागभा
ववत्कार्यं ॥ योगायतनमंत्यावयविशरीरं ॥ स्वसमवे
तसुखदुःखान्यतरसाक्षात्कारो भोगः ॥ यदवछिन्ने

शरीरसंयुक्ते १

आत्मनि योगस्तदायतनं॥ साक्षात्कारि [illegible] करणम
तीइंद्रियमिंद्रियं॥ ज्ञा[illegible]मानतया आत्मे[illegible]योग करणं
विषयः॥ पार्थिवमात्रे धनं तेजो भौमं॥ जल[illegible] धनं तेजो
दिव्यं॥ पार्थिवजले धनं तेजो औदर्यं॥ निरिंधनं तेजो आक
रजं॥ लक्षस्रुवर्णादि॥ सकलकारणयोगपद्यं गुत्पत्तिः॥ अ
नेकेषामेकक्षणतयासंबंधो योगपद्यं॥ विनागानुत्पाद्यवि
नाशं प्रागभाव संबंधकर्मावच्छिन्नकालः क्षणः तन्मात्रावस्था
यि[illegible] तद्ध्वंसानवच्छिन्न प्राक्काल संबंध स्व[illegible] रहित स्व
प्राग रूपत्वं स्वकार्यप्रागभाव संबंधत्वं वा विनाशः प्रध्वंसः शरी
रसंबंधेन ज्ञानवत्वं क्षेत्रज्ञत्वं प्रत्यासमसमवेत[illegible] धर्माध
र्मापरिगृहीतत्वं प्रत्यास्मनियत्वं सिनादिनासह[illegible] नां सितत्वादिकं
क्षणिकं४ स्थितिर्वर्तमानत्वं॥४

सक्त

लक्षणं॥मधुरादिनां सप्तानां मधुरत्वादिकं लक्षणं॥ग
चयोः सुरभिरसुरभित्वेएव॥शितादिनां त्रि तत्वादिकं ॥
एकत्वादिनां एकत्वादिकं॥अणुत्वादिनां अणुत्वादिकं॥एकपृ
थक्त्वादिनां एकपृथक्त्वादिकं॥कर्मासमवायी कारणः संयो
गजः कर्मजः॥संयोगासमवायिकारणः संयोगः संयोग
जः॥कर्मसमवायिकारणो विभागः कर्मजः॥विभागासम ॥९॥
॥९॥ वायिकारणो विभागो विभागजः॥आदित्यपरिवर्तनोत्पा
वे परत्वापरत्वे कालकृते॥आदित्यसंयोगानुत्पाद्ये पर
त्वापरत्वे दिक्कृते॥भावनासाधारणंकारणं ज्ञानेस्मृ
तिः॥असमृतिरूपं ज्ञानं अनुभवः॥तत्वानुभवः प्रमा॥
अतत्वानुभवोऽप्रमा॥अनवधारणं ज्ञानं संशयः॥अ
तद्वमन्नारोपित रूपा॥

प्रसक्तप्रमा॥ ज्ञायमानकर॥ जन्यसत्वोनुभवोर

वधारणरूपमतज्ज्ञानं विपर्ययः॥ अज्ञायमान करण
जन्य स्वत्वानुभवैर्नुमिति प्रमा प्रमायोग व्यवच्छिन्नं प्रमा
णं॥ प्रत्यक्ष प्रमायो व्यवच्छिन्नं प्रसक्त प्रमाणं॥ त
च्चैखर घ्राण रसन चक्षु स्पर्शन श्रोत्रं मनो लक्षं॥ त्वक्
प्रम अनुमिति प्रयोग व्यवच्छिन्नमनुमानं॥ तच्च व्याप्ति पक्षधर्म
ताविशिष्ट लिंगज्ञानं॥ व्याप्तिश्च व्यापकस्य व्याप्य निष्ठ घेकरूपो
नुपाध्यत्व वविशिष्टः संबंधः॥ पक्षधर्मताच्य व्याप्यस्य प
क्षसंबंधः॥ व्यापकं समव्याप्यं व्याप्यं लिंगं॥ नुपाधिः साधना
व्यापकत्वे सति साध्य समव्याप्तः॥ पक्षव्यापकः सपक्षे व्याप
कः विपक्षस्मान्योवार्तत्रायोस्सत्प्रतिपक्षः वत्वान्च
यी सव्यापकः सपक्षस्म योविपक्षाव्यावृत्तोव पितविरो

सप्त

योऽसत्प्रतिपक्षः केवलव्यतिरेकी पक्षव्यापकः सप
क्षसारीं विपक्षव्यावृत्तो अबाधितविषयोऽसत्प्र
तिपक्षो च पं व्यतिरेकि संदिग्धसाध्यधर्मत्वेनोपात्त
त्वं पक्षत्वं निश्चितसाध्याधिकरणत्वं सपक्षत्वं। निश्चि
तसाध्यानधिकरणत्वं॥ स्वार्थत्वमर्थरूपत्वं॥ परार्थत्वं
शब्दरूपत्वं॥ शब्दस्याप्यनुमानविषयत्वेनाविनाभा
॥१०॥ वोपजीवकत्वेनत्वानुमानत्वं॥ तत्र पक्षवचनं प्रतीज्ञा॥ लिं ॥१०॥
गस्य पक्षधर्मत्ववचनं हेतुः॥ दृष्टान्तवचनमुदाहरणं॥ परा
मर्शत्ववचनमुपनयः॥ लिंगप्रयुक्त[illegible]निश्चयसाध्यत्वव
चनं निगमनं॥ अंगवैकल्यमाभासत्वं॥ लिंगत्वेनानिश्चितत्व
मसिद्धत्वं॥ पक्षविपक्षमात्रस्पर्शित्वं विरुद्धत्वं॥ पक्षत्रय

संबेध

ष्टचिन्त्यमनेकांतिकत्वं॥ साध्यासाधकः पक्ष एव वर्त्तमानो
हेतुरनध्यवसितः सपक्षसिद्धावपि निरूपो हेतुः प्रकर
णसमः॥ साध्यस्तद्भाववत्साधारणत्वं संदिग्धत्वं॥ तत्पञ्जी
व्यत्रमापा निश्चितसाध्यविपरीतत्वं कालात्ययापदिष्ट
त्वं। अनिष्टव्यापकप्रसंजनं तर्कः॥ तुल्यत्वेनाभावयो
प्रत्यक्षाववचनं प्रसंजनं॥ निद्रादुष्टान्तःकरणजं ज्ञानं स्व
प्नः॥ योगजधर्मानुगृहीतस्य मनसो शरीरप्रदेशा नि
वस्थानं निद्रा॥ वस्तुनः स्वरूपमात्रग्रहणं निर्विकल्प
कं॥ विशिष्टस्य ग्रहणं सविकल्पकं॥ अतीतावस्था
वच्छिन्नवस्तुग्रहणं प्रत्यभिज्ञानं॥ दुःखसाधनताज्ञानं
हानं॥ सुखसाधनताज्ञानमुपादानं॥ उभयासाधन

सह

ज्ञानमुपेक्षा॥ अनालिंगितोन्नयकोट्यनवधार
णज्ञानमनध्यवसायः॥ प्रयत्नोत्पाद्यसाधनाधी
नं सुखं सांसारिकं॥ इच्छामात्राधीनसाधनसाध्य
सुखं स्वर्गसुखं॥ सांसिद्धिकत्वं तेजःसंयोगानुत्पाद्य
त्वं॥ नैमित्तिकत्वं तेजःसंयोगोत्पाद्यत्वं कर्मजः संस्कारोवे ॥११॥
॥११॥ गः॥ ज्ञानजः संस्कारो भावना॥ स्थित्यापाद्यको गुणः संस्का
रः स्थितः स्थापकः॥ मन्तुत्यापादकः संस्कारः स्थिति
स्थापकः॥ अव्यापकत्वं स्वाभावसादेश्यं॥ तत्रो व्याप
कत्वं॥ विहितत्वं धर्मोत्पादकत्वं॥ निषिद्धत्वं अधर्मोत्पादक
त्वं॥ अन्वयविपरितत्वं उदासीनत्वं॥ निर्बाधकत्वं सामान्यं
जातिः॥ सबाधकं सामान्यमुपाधिः॥ आरोपितनिष्ठरूपो

ऽज्ञावोंधकारः॥ ज्ञानसंबध्यो ज्ञानविषयत्वं॥ तत्त्वज्ञाने
नानियमेनावच्छेद्यत्वं प्रमेयत्वं॥ गुणादिषु। संख्याव्य
वहारः संख्याप्रत्यासत्तिनिबंधनः॥ अत एव संख्या
प्रत्यासत्तिनिबंधनत्वं कार्योत्पादकत्वं कारणत्वं॥
स्वसमवेतकार्योत्पादकत्वं समवायीकारणत्वं॥ समा
वायीकारणप्रत्यासन्नमवहृतसामर्थ्यं तदसमवायी
कारणं॥ उभयविपरीतकारणं निमित्तकारणं॥ इय
तावच्छिन्नासामग्री संज्ञामात्रेण पदार्थपरिमाणयोगी
र्त्त मूर्चत्वं॥ तदभावो अमूर्तत्वं कार्यायोगव्यवच्छिन्नासामग्री॥
संज्ञामात्रेण पदार्थाभिधानं उद्देशः॥ रूपरसगंधस्प
र्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापर

सप्त

॥१२॥

चगुरुत्वद्रवत्वसंस्काराः पृथिविसमवे ॥ रूपर
सस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगवि भागपर
त्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्काराः अ संमवे
ताः॥ रूपस्पर्शसंख्यापरिमाणपृथक्त्वसं योगविभा
गपर परत्वद्रवत्वसंस्कारास्तेजःसम ताः॥स्पर्श
संख्या परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसं
स्कारा युसमवेताः॥ संख्यापरिमाणपृथक्त्वसंयो
गविभागशब्दाः आकाशसमवेताः॥ संख्यापरिमा
णपृथक्त्व [illegible] संयोगविभागाः काल मवेताः॥
संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धि सुखदुः
खेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः आ त्मसमवेताः॥

दि १३

॥१२॥

संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाप
रत्वसंस्काराः मनःसमवेताः॥ कर्म मूर्त्तद्रव्यसमवे
तं अनित्यमेव॥ सामान्यं द्रव्यगुणकर्मसमवेतं॥ वि
शेषाः नित्यद्रव्यसमवेताः॥ समवायाभावावसमवेता
वेव॥ द्रव्यं तु कार्यरूपं स्वावयवसमवेतं॥ अकार्यद्रव्य
त्वसमवेतमेव॥ विनाशस्तु द्रव्यस्य समवायासमवायि
कारणविनाशाभ्यां॥ गुणस्य समवाय्यसमवायनिमित्त
कारणविनाशविरोधिगुणेभ्यः॥ कर्मणः समवाय्यसम
वायिकारणनाशोत्तरसंयोगाभ्यां॥ प्रागभावस्य प्रतियो
ग्युत्पादकसामग्रीतः॥ अन्योन्याभावस्य प्रतियोगिवि

K.K.S.U. LIBRARY RAMTEK

25

स५

नाशकारणात्॥ उत्पत्तिस्तु द्रव्यगुणकर्मणां। समवाय्य
समवायिकारणानिमित्तेभ्यः॥ तत्र समवायिकारणं त्र
याणां द्रव्यमेव॥ असमवायिकारणं द्रव्यकर्मणोः संयो
गएव॥ गुणस्य त्वसमवायिकारणं क्वचित्समानजाती
यं॥ क्वचिदसमानजातीयं गुणान्तरं क्वचित्कर्म निमित्त
१२३॥ कारणं सर्वेषामेव ईश्वरेच्छादृष्टादिः॥ अन्योन्याभाव ॥१२॥
प्रध्वंसाभावयोस्तु निमित्तादेव केवलादुत्पत्तिरिति॥
अपरं तु सकलशास्त्रं सुबोधमिति वैशिष्ट्यमन्यव्या
वृत्तिः॥ सामानाधिकरण्यं व्यावर्त्तकं विशेषणं॥ एकवि
भक्त्यंतपदवाच्यत्वं सामानाधिकरण्यत्वं व्यधिकरणाभ
वच्छेदकमुपलक्षणं भिन्नविभक्त्यंतपदवाच्यत्वं वै

KKSU LIBRARY
RAMTEK
441 106
M-1650
Dist. Nagpur

प्त

ऽप्यधिकरणं॥ जातिप्रत्यासत्तिरप्यधिकरणत्वं॥ समस्ता
मूर्त्तसंयोगित्वं विभुत्वं विद्यमानयोः संबंधो युतसि
द्धिः॥ अविद्यमानयोराधाराधेययोः संबंधो अयुत
सिद्धिः॥ अभ्युदयनिश्श्रेयससाधनाविद्यानाशकं शा
।१४। स्त्रमितेः॥ सप्तद्विपा धरा यावद्यावत्सप्तधर धराः॥ ता ॥१४
वत्सप्तपदार्थीयमर्कवत्प्रकाशिनी॥ छ॥ ॥छ॥
इति श्रीसप्तपदार्थी समाप्ता॥ छ॥ ॥छ॥ श्रीरस्तु॥

```
[OrderDescription]
,CREATED=23.09.20 10:30
,TRANSFERRED=2020/09/23 at 10:35:10
,PAGES=27
,TYPE=STD
,NAME=S0003655
,Book Name=M-1650-SAPTPDARTHI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,
```